उपशास्त्री - I

02-12-2020

सन्धिविच्छेदः, रूपसिद्धिश्च ।

सुद्ध्युपास्यः / सुध्युपास्यः → सुधी + उपास्यः ।

स् उ ध् ई + उ प् आ स् य् अः ।

सु ध् य् + उ पा स्यः ← 'इको यणचि ।'
'स्थानेऽन्तरतमः ।'

सु ध् ध् य् + उ पा स्यः ← 'अनचि च' सूत्रेण विकल्पेन धकारस्य द्वित्वम् ।

सु द् ध् य् + उपास्यः ← 'झलां जश् झशि' पूर्व धकारस्थाने दकारः ।

सुद्ध्युपास्यः रूपं निष्पन्नम् ।

सुध्युपास्यः → विकल्पेन सु ध् य् + उपास्यः । अत्र धकारस्य दकारः न । कथं ? धकारोत्तरवर्ती यकारः झश् प्रत्याहारस्य वर्णः नास्ति । 'संयोगान्तस्य लोपः' सूत्रेण 'अलोऽन्त्यस्य' सूत्रसहाय्येन यकारस्य लोपः किन्तु 'यणः प्रतिषेधो वाच्यः' वार्तिकेन निषेधः । ततः 'अज्झीनं परेण संयोज्यम्', सुध्युपास्यः रूपं निष्पन्नम् भवति ।

एवं प्रकारेण मद्ध्वरिः, मध्वरिः, धात्रंशः, लाकृतिः । यण् सन्धेः उदाहरणानि → इत्यलम्, यद्यपि, इत्युक्त्वा, अत्युक्तिः, नद्यम्बुः, अत्याचारः, अन्वयः, स्वागतम्, यद्यत्र ।

02-12-2020

डॉ० निर्मल कुमार झा, स० प्राचार्य
राधा-उमाकान्त सं० महावि० सुखसेना, पूर्णियाँ
का० सिं० द० सं० विश्ववि० दरभङ्गा

संस्कृतसामान्यम्। उपशास्त्री II 02-12-2020
अनिवार्यप्रथमपत्रम्। हल् सन्धि (व्यञ्जन) प्रकरणम्।

① "स्तोः श्चुना श्चुः", "शात्" →
हरिश्शेते - हरिस् + शेते। रामश्चिनोति - रामस् + चिनोति।
सच्चित् - सत् + चित्। शार्ङ्गिञ्जयः - शार्ङ्गिन् + जयः।
विश्नः - विश् + नः, 'स्तोः श्चुना श्चुः' सूत्रस्य 'शात्' सूत्रेण निषेधः।
प्रश्नः - प्रश् + नः, शात् सूत्रेण।

② "ष्टुना ष्टुः"। "न पदान्ताट्टोरनाम्।", "तोः षि।" →
रामष्षष्ठः - रामस् + षष्ठः। रामष्टीकते - रामस् + टीकते।
पेष्टा - पेष् + ता। तट्टीका - तत् + टीका।
षट् सन्तः - षट् + सन्तः। ईट्टे - ईट् + ते।
षण्णाम् - षड् + नाम। षण्णवतिः - षड् + नवतिः।

③ "झलां जशोऽन्ते।", "यरोऽनुनासिकेऽनुनासिको वा।", "तोर्लि।" →
वागीशः - वाक् + ईशः। चिद्रूपम् - चित् + रूपम्। एतन्मुरारिः - एतत् + मुरारिः। एतद्मुरारिः - एतत् + मुरारिः।
तन्मात्रम् - तद् + मात्रम्। चिन्मयम् - चिद् + मयम्।
तल्लयः - तत् + लयः। विद्वाँल्लिखति - विद्वान् + लिखति।

④ "खरि च।" → उत्थ्थानम् / उत्थानम् → उत् + स्थानम्।
उत्तम्भनम् → उद् + स्तम्भनम्।

⑤ "झयो होऽन्यतरस्याम्।", "शश्छोऽटि।"
वाग्हरिः / वाग्घरिः → वाक् + हरिः।
तच्शिवः / तच्छिवः → तत् + शिवः।
तच्श्लोकेन / तच्छ्लोकेन → तद् + श्लोकेन।

02-12-2020

डॉ॰ निर्मलकुमार झा, स॰ प्राचार्य
राधा-उमाकान्त सं॰ महावि॰ सुखसेना, पूर्णियाँ।

02-12-2020

साहित्यम् ।     शास्त्री

## छन्द विचारः ।

" आत्मारामा विहितरतयो निर्विकल्पे समाधौ
ज्ञानोत्सेकाद्विघटिततमो ग्रन्थयः सत्वनिष्ठाः ।
यं वीक्षन्ते कमपि तमसां ज्योतिषां वा परस्तात्
तं मोहान्धः कथमयममुं वेत्तु देवं पुराणम् ।। "

श्रीभट्टनारायण / वेणीसंहार → १ | २३

प्रदत्तस्य श्लोकस्य प्रत्येके चरणे सप्तदशाक्षराः सन्ति ।
अतएव अयं श्लोकः अत्यष्टिः जात्याः अस्ति ।
श्लोके यगणादि निर्णयः →

आत्मारामा विहितरतयो निर्विकल्पे समाधौ
S S S S I I I I I S S I S S I S S
मगण भगण नगण तगण तगण गुरु गुरु

ज्ञानोत्सेकाद्विघटिततमो ग्रन्थयः सत्वनिष्ठाः ।
S S S S I I I I I S S I S S I S S
मगण भगण नगण तगण तगण गुरु गुरु

अस्मिन् पद्ये प्रत्येके चरणे क्रमशः मगणभगणौ, नगणतगणौ तथा पुनः तगणात् पश्चात् गुरुद्वयमस्ति । अतएवात्र अत्यष्टिजात्याः मन्दाक्रान्ता छन्दः अस्ति ।
तल्लक्षणम् → " मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद् गुरुचेत् "
अस्मिन् छन्दे चतुर्भिः षड्भिः सप्तभिश्च यतिः भवति ।

02-12-2020

डॉ० निर्मल कुमार झा, ( सं० प्राचार्यः ) ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।